वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

# भारतीयसमाजरचनायां संस्कृतवाङ्मयस्य भूमिका

सञ्जयकुमारः के. ब्रह्मभट्टः[1]

संस्कृतवाङ्ग्यम् अत्यन्तं विशालम् अस्ति। संस्कृतवाङ्ग्यं सद्गुणानां भाण्डागारमस्ति। मानवमूल्यानां महासागरः अस्ति। नीतिमत्तायाः नीधिः अस्ति। भारातीयसमाजस्य निर्माणे संस्कृतवाङ्ग्यस्य भूमिका अद्वितीया असामान्या विरला च अस्ति। समाजरचनायां संस्कृतवाङ्ग्यस्य भूमिका अविस्मरणीया अस्ति। समग्रविश्वे अहिंसा सदाचारः परोपकारः करुणा धैर्यम् इत्यादीनां सद्गुणानां प्रचारप्रसारः संस्कृतवाङ्ग्यस्य योगदानेन एव अस्ति। संस्कृतवाङ्ग्येन प्रदर्शिता प्रसारिता च सद्गुणाः एव सुसभ्य एवं सुसंस्कृतसमाजस्य रचनायाः स्तम्भाः सन्ति।

समाजे जनानां कर्तव्यं किं भवेत् ? का च तेषां भूमिका ? एतत् सर्वं संस्कृतग्रन्थेषु वर्णितम् अस्ति। साहित्यस्य एवं सामाजिकजीवनस्य परस्परं सामीप्यं भवति। अतः आङ्गलभाषायाम् एका उक्तिः दृश्यते। “Literature is a mirror of life”. सुसंस्कृतसमाजनिर्माणं सुसंस्कृतजनानाम् एवं सुशिक्षितजनानां सत्पुरुषाणां च आधारेण भवति। तादृशानां जनानां वर्णनं वयं सुंस्कृतवाङ्मये भर्तृहरेः नीतिशतके पश्यामः

**"दाक्षिण्यं स्वजने दया परिजने शाठ्य सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम्।**
**शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः॥”**

संस्कृतवाङ्ग्यस्य एकैकं सुभाषितं समाजरचनायाः इष्टिकारूपेण वर्तते। Sanskrit literature has helped human being live ethically and virtuously in the society. संस्कृतवाङ्ग्ये वर्णितं रामस्य जीवनचरित्रं दृष्ट्वा एव समाजे रामराज्यस्य कल्पना आगता अस्ति। भारतीयसमाजरचनायां षोडशसंस्काराः वर्णव्यवस्था आश्रमव्यवस्था च संस्कृतवाङ्ग्यस्य भूमिकायाः उत्तमानि उदाहरणानि सन्ति। संस्कृतवाङ्ग्येन प्रदत्ता धर्मार्थकाममोक्षाणां च विचारधारा भारतीयसमाजस्य

[1] *ब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियादः, मो. 9427854374*

आधारस्तम्भ इव अस्ति। भारतीयसमाजरचनायां मनुस्मृत्याः महत्त्वम् अधिकम् अस्ति। भारतीयसमाजे मनुस्मृत्याः प्रभावः विशेषः अस्ति। संस्कृतवाङ्मयेन प्रादुर्भूता आचारग्रन्थाः भारतीयसमाजनिर्माणस्य मूलम् अस्ति।

संस्कृतवाङ्मयस्य ग्रन्थानाम् अध्ययनेन वयं सच्छिक्षणं सद्विचारं सद्वर्तनं सद्‌गुणं च प्राप्नुमः। समाजे एतानि आदर्शमूल्यानि आवश्यकानि सन्ति। " True education makes a man physically healthy, mentally peaceful, emotionally balanced and spiritually matured."

सुसंस्कृतसमाजस्य आधारः समाजस्य शिक्षणव्यवस्थाया उपरि अस्ति। True education is a backbone of a cultured society and that true education can be derived from Sanskrit Literature. शिक्षणक्षेत्रे संस्कृतवाङ्मयस्य प्रदानं प्रशंसनीयं गौरवपूर्णं च अस्ति।

भारतीयसंस्कृत्याः मूलं तु वेदाः सन्ति। वेदाः संस्कृतभाषायां सन्ति। बहवः संस्कृतग्रन्थाः यथा रामायणं महाभारतं पुराणानि इत्यादयः समाजे कथं वर्तितव्यम् इति शिक्षयन्ति। अतः एका उक्तिः प्रसिद्धा अस्ति। "रामादिवत् वर्तितव्यम्। न रावणादिवत्" इति। समाजे संस्कृतवाङ्मयस्य सर्वेषु क्षेत्रेषु योगदानम् अस्ति। भारतीयसंस्कृत्याः प्रभावः भारतीयसमाजे प्रबलरूपेण अस्ति। एवं च भारतीयसंस्कृत्याः मूलं संस्कृतम् अस्ति। अतः कथ्यते- 'A language is a vehicle of the civilization.' मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। एताः सूक्तयः सुसंस्कृतसमाजं निर्मातुं प्रेरयन्ति। तथा च मूल्यरूपेण प्रस्थापिताः भवन्ति।

सद्वर्तनं सच्चरितं सदाचारं च सामाजरचनायाः आवश्यकानि अङ्गानि सन्ति। अतः महाभारते "आचारः प्रथमो धर्मः"। संस्कृतवाङ्मये धर्मः इत्युक्तेः अस्माकं नैतिककर्तव्यम्। अस्माभिः समाजे कथं वर्तितव्यम् इति सद्ग्रन्थाः प्रदर्शयन्ति। अतः समाजरचनायां तेषां महद्योगदानम् अस्ति।

संस्कृतवाङ्मयस्य धर्मग्रन्थेषु काव्येषु नाटकेषु नीतिकाव्येषु महाकाव्येषु दर्शनशास्त्रेषु भिन्नभिन्नरीत्या समाजे साफल्यपूर्णं धर्मयुक्तं च जीवनं कथं यापनीयम् इति सुष्ठु प्रर्दशितम् अस्ति। यथा रामचरितमानसे तुलसीदासेन लिखितम् अस्ति।

**परहित सरिस धरम नाहि भाई।**
**परपीडा सम नहि अधमाई॥**

वेदव्यासेनापि उक्तम्

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**

अत्र परोपकारः समाजे एकमूल्यरूपेण तैः प्रस्थापितः। राष्ट्रनिमार्णस्य समाजनिमार्णस्य च प्रक्रियायां रामायणं महाभारतं च मुख्यौ आधारौ स्तः। रामायणे यानि यानि पात्राणि निरूपितानि तानि समाजे आदर्शरूपाणि सन्ति।

अस्माकं राष्ट्रस्य इतिहासं, संस्कृतिं, धर्मं, परंपरां च ज्ञातुं आधारभूतं वैदिकवाङ्गमयम् अस्ति। वेदानां विचाराः समग्रमानवजातिम् उन्नत्याः मार्गे नयन्ति। यथा एकं सद्विप्राः बहुधा वदन्ति। सत्यं वद। धर्म चर। सुचारुसमाजव्यवस्थायाः चरित्रचित्रणं संस्कृतवाङ्गयेन सम्यक् प्रदर्शितम् अस्ति। अतः वयं कथयितुं शक्नुमः यत् संस्कृतवाङ्गयस्य भूमिका राष्ट्रनिमार्णे समाजनिर्माणे च अविस्मरणीया अनूपमा अद्वितीया च अस्ति।

अन्ते एका पंक्तिः मम मनसि आगच्छति।

**“भारतभूषा संस्कृतभाषा विलसतु हृदये हृदये।**
**संस्कृतिरक्षा राष्ट्रसमृद्धिर्भवतु हि भारतदेशे॥"**

~~~~~~~~~~~
~~~~~~~~~~~